धावनं षष्ठीतत्पुरुषः।) अङ्गानां स्थानात् स्थानान्तरनयनं। तत्पर्य्यायः। अङ्गविक्षेपः २। इत्यमरः॥ अङ्गहारिः ३। इति तट्टीका॥ स्थिरहस्तपर्य्यस्तकादिको द्वात्रिंशत्प्रकारः। इति मधुः॥ वृश्चिकभ्रमरादिद्वात्रिंशद्रूपः। इति रायः। अङ्गुल्यादिविन्यासस्त्रिंशद्रूपः। इति कौमुदी॥

अङ्गहारिः, पुं, (अङ्गानि ह्रियन्ते चाल्यन्तेऽत्र अङ्ग+हृ+इञ् अजादिभ्यश्च इति पाणिनिसूत्रेण अधिकरणे इञ्। रङ्गभूमिः, नृत्यभूमिश्च।) अङ्गहारः। इति भरतधृतवहुचन्द्रः॥

अङ्गहीनः, त्रि, (अङ्गेन हीनः रहितः तृतीया तत्पुरुषः। हा+कर्म्मणि क्तः।) अवयवरहितः। अङ्गहानिविशिष्टः। (यथा, याज्ञवल्क्यः,—
"कालकर्म्मात्मबीजानां दोषैर्मातुस्तथैव च।
गर्भस्य वैकृतं दृष्टमङ्गहीनादि जन्मतः॥)
अङ्गहीनं क्रियाहीनं विधिहीनञ्च यद्भवेत्"॥
इति स्मृतिः॥ कामदेवे पुंलिङ्गः॥

अङ्गाधिपः, पुं, (अङ्गस्य देशविशेषस्य अधिपः षष्ठीतत्पुरुषः।) अङ्गदेशाधिपतिः। स च कर्णः। इति भूरिप्रयोगः॥

अङ्गारः, पुं, क्ली, (अगि+आरन् इदितो नुम्धातोरिति नुम्।) दग्धकाष्ठखण्डं। तत्तु निरग्नि साग्नि च। कयला आङ्गरा इति भाषा। तत्पर्य्यायः। अलातं २ उल्मूकं ३। इत्यमरः॥ आलातं ४ उल्मूकं ५। इति तट्टीका। ("घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्"।)

अङ्गारः, पुं, (रक्तं रक्तवर्णमङ्गं यस्य स बहुव्रीहिः पृषोदरादित्वात् साधुः।) मङ्गलग्रहः। इति मेदिनी॥ हितावली। इति वैद्यकं॥

अङ्गारकः, पुं, (अङ्गार+स्वार्थे कः।) मङ्गलग्रहः इत्यमरः,—
("धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः।
अङ्गारको यमश्चैव सर्व्वरोगापहारकः"॥
इति वराहपुराणम्।) (रामायणे,—
"दिवीव ग्रहयोर्घोरं बुधाङ्गारकयोर्महत्।
कौशलानाञ्च नक्षत्रं व्यक्तं मैत्रामिदैवतं।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे"॥)
अङ्गारः। कुरुण्टकवृक्षः। इति मेदिनी॥ भृङ्गराजः। इति राजनिर्घण्टः॥

अङ्गारतैलं, क्ली, (अङ्गारेण पक्वं तैलं शाकपार्थिवादित्वात् समासः। मध्यपदलोपश्च) स्वनामख्यातपक्वतैलं। तस्य पाकप्रकारो यथा। यथा,—
"मूर्व्वा लाक्षा हरिद्रे द्वे मञ्जिष्ठा सेन्द्रवारुणी।
बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी॥
आरनालाढ़केनैव तैलप्रस्थं विपाचयेत्।
तैलमङ्गारकं नाम सर्व्वज्वरविमोक्षणं"॥
इति सुखबोधः॥

अङ्गारकमणिः, पुं, (रक्तवर्णत्वादङ्गारकवत् मणिः अथवा अङ्गारकस्य मणिः षष्ठीतत्पुरुषः। माणिक्यं भास्करे देयं चन्द्रे मुक्तां प्रदापयेत् प्रवालञ्च कुजे दद्यादित्यादिना तत्कृताशुभप्रतिकाराय प्रवालदानोक्तेः तत्प्रियत्वं।) प्रवालः। इति राजनिर्घण्टः॥

अङ्गारकुष्ठकः, पुं, (अङ्गारवर्णं कुष्ठमिव कन्) हितावली। इति राजनिर्घण्टः॥

अङ्गारधानिका, स्त्री, (अङ्गाराणि धीयन्ते धार्य्यन्तेऽत्र धा+अधिकरणे ल्युट् स्त्रियां ङीप्। अङ्गाराणां धानी ततः स्वार्थे कः। पक्षे अङ्गारधानी।) अङ्गारधारणपात्रं। आङ्टा इति ख्याता। साँजाल इति केचित्। तत्पर्य्यायः। अङ्गारशकटी २ हसन्ती ३ हसनी ४। इत्यमरः॥

अङ्गारपरिपाचितं, क्ली, (अङ्गारेण परिपाच्यते परि+पच्+स्वार्थे णिच् ततः कर्म्मणि क्तः।) अङ्गारपक्वं। शूलविद्धाङ्गारदग्धमांसं। कावाव इति ख्यातं। इति शब्दचन्द्रिका॥

अङ्गारपर्णः, पुं, (अङ्गारवत् पर्णं पत्रं यस्य स बहुव्रीहिः। वनभेदे। सोऽस्यास्ति ततः अर्श आद्यच् तत्स्वामी) चित्ररथगन्धर्व्वः। इति महाभारतं॥

अङ्गारपुष्पः, पुं, (अङ्गारवत् रक्तवर्णं पुष्पं यस्य सः बहुव्रीहिः।) इङ्गुदीवृक्षः। जियापुता। इति ख्यातः। इति रत्नमाला॥

अङ्गारमञ्जी, स्त्री, (अङ्गारवत् रक्तवर्णा मञ्जी मञ्जरी यस्याः सा बहुव्रीहिः। समासान्तविधेरनित्यत्वात् कवभावः।) करञ्जविशेषः। इति शब्दरत्नावली॥ अस्य नामान्तरं अङ्गारमञ्जरी॥

अङ्गारवल्लरी, स्त्री, करञ्जविशेषः। इत्यमरः॥ भार्गी। गुञ्जा। इति राजनिर्घण्टः॥

अङ्गारवल्ली, स्त्री, (अङ्गारवत् रक्तवर्णा वल्ली कर्म्मधारयः। गुञ्जालता, स्वार्थे कन् अङ्गारवल्लिका।) महाकरञ्जः। भार्गी। इति राजनिर्घण्टः॥

अङ्गारशकटी, स्त्री, (शक्नोति वोढुं शकटं। शकट+स्त्रियां ङीप् अल्पार्थे शकटी। अङ्गारस्य शकटी षष्ठीतत्पुरुषः। आङ्टा इति भाषा। धुनाची इति) अङ्गारधानिका। इत्यमरः॥

अङ्गारिः, स्त्री, (अङ्गारमस्या अस्ति अङ्गार+अत इन् ठनाविति ठन् तस्य इ कः पृषोदरादित्वात् कलोपः) अङ्गारधानिका। इति जटाधरः॥

अङ्गारिका, स्त्री, (अङ्गारवत् रक्तवर्णा अङ्गार+इवार्थे कन् स्त्रियां टाप्) इक्षुकाण्डं। पलाशकलिका। इति मेदिनी॥ (अङ्गारमस्या अस्ति अङ्गार+मत्वर्थे ठन् तस्य इ कः स्त्रियां टाप् इति व्युत्पत्त्या अङ्गारपात्रम्।)

अङ्गारिणी, स्त्री, (अङ्गारमस्या अस्ति अङ्गार+मत्वर्थे इन् स्त्रियां ङीप्।) अङ्गारधानिका। भास्करत्यक्ता दिक्। (सूर्य्यत्यक्ततया अङ्गारवत् रक्तवर्णा दिक्।) इति मेदिनी॥

अङ्गारितं, क्ली, (अङ्गारमिवाचरति अङ्गार+क्विप् ततः क्तः।) पलाशकलिकोद्गमः। (अङ्गारं करोति अङ्गार+णिच् कर्म्मणि क्तः। मत्वर्थे इतच् वा दग्धप्रायकाष्ठं) दग्धे त्रि। इति विश्वः।

अङ्गिका, स्त्री, कञ्चुकः। काँचली इति ख्याता। इति हेमचन्द्रः॥

अङ्गिरा, [स्] पुं, (अङ्गति ब्रह्मणो मुखान्निःसरति अगि गतौ+असु इरुट् च) मुनिविशेषः। स च ब्रह्मणो मुखाज्जातः। तस्य भार्य्या कर्द्दममुनिकन्या श्रद्धा। पुत्त्रः उतथ्यः १ बृहस्पतिः २। कन्या सिनीवाली १ कुहूः २ राका ३ अनुमतिः।४। इति श्रीभागवतं॥

अङ्गी, [न्] त्रि, (अङ्गं विद्यतेऽस्य अङ्ग+मत्वर्थे इन्।) अङ्गविशिष्टः। अवयवी। यथा येनाङ्गेनाङ्गी विकृतो भवेत तस्मादङ्गाच्च त्रि। इति मुग्धबोधटीकायां दुर्गादासः॥ प्रधानं। मुख्यः। यथा। "यद्यङ्गी स्यादसान्तरे"। इति ध्वनिकारः॥

अङ्गीकारः, पुं, (अङ्गीति च्व्यन्तं तत्पूर्व्वकात् कृ+घञ्) स्वीकारः। तत्पर्य्यायः। सम्बित् २ आगूः ३ प्रतिज्ञानं ४ नियमः ५ आश्रवः ६ संश्रवः ७ अभ्युपगमः ८ समाधिः ९ प्रतिश्रवः१०। इत्यमरः॥

अङ्गीकृतं, त्रि, (अङ्गीति च्व्यन्तं तत्पूर्व्वकात् कृ+कर्म्मणि क्तः) स्वीकृतं तस्य पर्य्यायः। ऊरीकृतं २ उररीकृतं ३ आश्रुतं ४ प्रतिज्ञातं ५ संगीर्णं ६ विदितं ७ संश्रुतं ८ समाहितं ९ उपश्रुतं १० उपगतं ११ प्रतिश्रुतं १२ अभ्युपगतं १३। इत्यमरः॥

अङ्गुरिः, स्त्री, (अगि गतौ+उ णिच् रलयोरेकत्वस्मरणात् लस्य रत्वम्) पाणिपादाङ्गुली। इत्युणादिकोषः॥

अङ्गुरिः, स्त्री, (अङ्ग+उणिच् पक्षे ङीप्) अङ्गुली। इत्यमरटीका॥

अङ्गुरीयः, पुं, क्ली, (अङ्गुरेरिदं तत्र भवं वा अङ्गुरि+छः तस्य ईयः) अङ्गुलीयकं। आङ्गुटी इति भाषा। अङ्गुली भवं अङ्गुलीयं गहीषादित्वात् लस्य रः। इति भरतः॥ (यथा रामायणे,—
"ददौ चास्य तदा प्रीतः स्वनामाङ्काभिचिह्नितं।
अङ्गुरीयमभिज्ञानं राजपुत्र्याः परन्तपः"॥)

अङ्गुरीयकं, क्ली, पुं, (स्वार्थे कः) अङ्गुलीयकं। इत्यमरटीकायां मुकुटादयः॥ रामायणे,—
"रामनामाङ्कितञ्चेदं पश्य देव्यङ्गुरीयकं"।

अङ्गुलः पुं, (अङ्ग+उन् अङ्गौ हस्ते लीयते अङ्गु+ली+डः) हेमचन्द्रः॥ अङ्गुली॥ इत्यमरटीकायां रमानाथः॥ अष्टयवपरिमाणं। इत्यमरटीकायां वाचस्पतिः॥ (अष्टसंख्यकयवोदरपरिमाणे यवोदरैरङ्गुलमष्टसंख्यैरिति भास्कराचार्य्योक्तेः न०।) (यथा रामायणे,—
"न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरं"।)

अङ्गुलिः, स्त्री, (अङ्ग+उलिच्) करशाखा। आङ्गुल इति भाषा। (यथा मनुः,—
"कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः"।) गजकर्णिका। हस्तिशुण्डाग्रभागः। इति हेमचन्द्रः॥ अङ्गुष्ठः। इत्युणादिकोषः॥

अङ्गुलितोरणं क्ली, (अङ्गुलेः तोरणं बहिर्द्वारमिव षष्ठीतत्पुरुषः) चन्दनादिद्वारा ललाटे कृतोऽर्द्धचन्द्रः। इति हारावली॥